Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# कविव्यापारवक्रत्वप्रकारम्



नर्मदा बेहेरा
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालय:,
तिरुपति: , आन्ध्रप्रदेश:, भारत।

**Article Info**
Volume 3, Issue 5
Page Number: 156-158
**Publication Issue :**
September-October-2020
**Article History**
Accepted : 10 Sep 2020
Published : 20 Sep 2020

**सारांश**

वक्रोक्तिर्वचो भङ्गिमा एव । यत्र कस्मिंश्चिद् वर्ण्यविषये तस्य कस्यचिद् धर्मस्य गुणस्य वाऽतिशयनोक्ति: वैचित्र्येण विच्छित्या वा प्रतिपादनम् तत्र वक्रोक्ति: । सैषा वर्ण –पद–प्रत्यय–वाक्य–प्रकरण–प्रबन्ध भेदेन षड्प्रकारका ।

**मुख्यशब्द:**–कवि:, व्यापार:, वक्रोक्ति:, भङ्गिमा, अलंकार:, सम्प्रदाय:, आचार्य:।

---

काव्यलक्षणविषये संस्कृतज्ञानां नैकमत्यम् । यस्माद् षड् संप्रदायानाम् आविर्भाव: । अलङ्कार सम्प्रदाय:,रस सम्प्रदाय:,ध्वनि सम्प्रदाय:,वक्रोक्ति सम्प्रदाय:,रीति सम्प्रदाय:,औचित्यसम्प्रदायेषु एतेषु षड् सम्प्रदायेषु वक्रोक्ति सम्प्रदाय: विशिष्ट: प्रमुखश्च। आनन्दवर्धनाचार्यप्रतिपादितेन ध्वनिसिद्धान्तेन नैराश्याम् आप्ता अलङ्कारवादिन: अलङ्कारेषु काव्यस्य मूलतत्वं अन्वेषयन्तो वक्रोक्तिम् समासादयन् ।

वक्रोक्तिसिद्धान्तस्यास्य उद्भव: आचार्य भामहेन प्रारभते । भामहाभिमतेन वक्रोक्ति: सर्वालंकाररूपा। सर्वेषाम् अलङ्कारणाम् मूलमेतत्। अनयैव अर्थाभिव्यक्ति:। वक्रोक्तिरेव काव्यत्वम् सम्पादयति। सैषा सर्वालंकाररूपा।वक्रोक्ति: काव्ये समस्त सौन्दर्याभिदायिका।एवं भमहाभिमतेन वक्रोक्ति: काव्यस्यात्मा । यथा –

**सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।**
**यत्नोऽस्यां कविना कार्य: कोऽलङ्कारोऽनया विना ।।(काव्या.- 2/85)**

भोजराजोपि वक्रोक्तिम् उपास्ते। वक्रोक्ति मूलकं काव्यलक्षणम् उपपादयता तेनोच्यते –

**यद् वक्रम् वच: शास्त्रे लोके च वच एव तत्**
**वक्र यदर्थवादादौ तस्य काव्यमिति स्मृति: ।। (शृङ्गारप्रकाश:)**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

आचार्य दण्डी काव्यं द्विधा विभजति स्वभावोक्तिः , वक्रोक्तिश्च ।

**श्लेषः सर्वासु पुष्णाति प्रायो वक्त्रोक्तिषु श्रियम्।**

**भिन्नं द्विधा समासोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्।। (काव्यादर्शः)**

वक्रोक्तेः स्वरूपम् –

**उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।**

**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणिति रुच्यते।। (वक्रोक्तिः 1.10)**

वक्रोक्तिर्वचो भङ्‌गिमा एव । एषा वचोभङ्‌गिमा एव उक्तौ शोभाम् आदधाती । उक्तौ चमत्कृतेश्चारुतायाश्च सम्पादनं वक्रोक्तेरेव सम्भाव्यते ।अतः वक्रोतिः काव्यजीवनम्।वक्रोक्तिहीनं काव्यं निर्जीवमेव। उक्ते वैचित्र्यम् चमत्कृतिर्वा वक्रोक्तिः।सैषा विशेषता काव्यप्रतिभामूलैव।यत्र कस्मिंश्चिद् वर्ण्यविषये तस्य कस्यचिद् धर्मस्य गुणस्य वाऽतिशयेनोक्तिःवैचित्र्येण विच्छित्या वा प्रतिपादनं तत्र वक्रोक्तिः।

**शब्दार्थौ सहितौ वक्र कवि व्यापारशालिनि ।**

**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी ।।**

वक्र कविव्यापारशालिनि तद्दिदाह्लादकारिणी बन्धे व्यवस्थितौ शब्दार्थौ काव्यमिति ।कविव्यापारवक्रत्वम् षट् प्रकारकं सम्भवन्ति। यथा –

**कवि व्यापारवक्रत्व प्रकाराः सम्भवन्ति षट् ।**

**प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः।।**

कवि व्यापारवक्रत्व- प्रकाराः षट् सम्भवन्ति । तेषां प्रत्येकं बह्वयः भेदाः सन्ति ।
ते भेदाः यथा –

**वर्णविन्यास वक्रत्वं पदपूर्वार्ध वक्रता ।**

**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः ।।**

वर्णविन्यास – पदपूर्वार्ध – प्रत्ययाश्रित – वाक्य – प्रकरण – प्रबन्धभेदन षड्प्रकारकाः वक्रोक्तिः भवन्ति ।

1. वर्णविन्यासवक्रता –

वर्णविन्यासवक्रता वर्णानां विन्यासो वर्णविन्यासः अक्षराणांविशिष्टन्यसनं तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थान – व्यतिरेकिणा वैचित्र्येणोपनिबद्धः सन्निवेशविशेषविहितस्तद्दिदाह्लादकारी शब्दशोभातिषयः ।
यथा –

**प्रथममरुणच्छायस्तावत्ततः कनकप्रभ**

**स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।**

**प्रसरति ततो ध्वान्तक्षोदक्षमः क्षणदामुखे ,**

**सरसबिसिनीकन्दच्छेदच्छविमृगलाञ्छनः ।।**

अत्र वर्णविन्यासवक्रतामात्रविहितः शब्दशोभातिशयः उन्मिलितः।

2. पदपूर्वार्द्ध वक्रता –

**रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धि परा**

**मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम् ।**

**वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति**

**श्रेणीभूतविशालतालविवरोद्गीर्णै: स्वरै: सप्तभि: ॥**

अत्र रामशब्दो लोकोत्तरशौर्यादिधर्मातिशयाध्यारोप परत्वेनोपात्तो वक्रतां प्रथयति ।

3. प्रत्ययाश्रय वक्रता – प्रत्यय: सुप्तिङ् च यस्याश्रय: स्थानं न तथोक्त:। तथापि बहव: प्रकारा: सम्भवन्ति- संख्या-कारक-पुरुष इत्यादय: ।

यथा – **मैथिली तस्य दारा: ।**

4.वाक्यवक्रता –

**वाक्यस्य वक्रभावोऽन्यो भिद्यते य: सहस्रधा ।**

**यात्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ।।**

वाक्यस्य वक्रभाव: अन्य: य: सहस्रधा भिद्यते । यत्र अलङ्कारवर्ग: असौ सर्व: अपि अन्तर्भवति।

**उपस्थितां पूर्वमपास्य लक्ष्मी वनं मया सार्धमसि प्रपन्न: ।**

**त्वमाश्रयं प्राप्य तयानुकोपात् सोढास्मि न त्वद्भवने वमन्ती ॥**

5. प्रकरणवक्रता-

**वक्रभाव: प्रकरणे प्रबन्धे यास्ति यादृश: ।**

**उच्यते सहजाहार्य सौकुमार्य मनोहर: ।।**

वक्रभाव: प्रकरणे प्रबन्धे यादृशोऽस्ति नाटकादौ कथ्यते । यथा – तत्र प्रकरणे वक्रभावो यथा – रामायणे मारीचमायामयमाणिक्यमृगानुसारिणो रामस्य करुणाक्रन्दकर्णनकान्तरान्त:करणया जनक राजपुत्र्या तत्प्राणपरित्राणाय स्वजीवितपरिरक्षानिरपेक्षया लक्ष्मणो निर्भत्स्य प्रेषित: ।

6. प्रबन्धवक्रता –

कुत्रचिन्महाकवि विरचित रामकथोपनिबन्धे नाटकादौ पञ्चविधवक्रतासामग्रीसमुदायसुन्दरं हृदयहारी महापुरुषवर्णनमुपक्रमे प्रतिभासते परमार्थस्तु विधिनिश्चयात्मक धर्मोपदेश: पर्यवस्यति, रामवद् वर्तितव्यं न रावणावदिति।

एवं प्रकारेण वर्णविन्यास – पदपूर्वार्ध – प्रत्ययाश्रित – वाक्य – प्रकरण – प्रबन्धाश्रित भेदेन षड् प्रकारकं कविव्यापारवक्रत्वं प्रतिपादितम्।

**सहायक ग्रन्थसूची**


1. ध्वन्यालोक: – सांवीदी प्रकाशनम् , वाराणसी
2. वक्रोक्तिकाव्यजीवितम् – चौखम्भा सुरभारती प्रकाशनम्, वाराणसी
3. काव्यादर्श: – चौखम्भा प्रकाशनम्, वाराणसी
4. श्रृंगारप्रकाश: – सांवीदी प्रकाशनम् , वाराणसी